# श्री विष्णुस्तुति :

1)विष्णोऽरस्मान् पदाब्जे कृतनिवसतयः पांसवः पावयन्तु ।
श्रीमन्तः श्रीकबर्यां कुसुमसुनिचये पूरयन्तः परागान् ।
लालाट्यां लेखिकायामजनिपवनयोरक्षतान् निक्षिपन्तः
पौनपुन्येन शुद्धिं हरशिरसि न ते जाह्नवीं जोषयन्तः ॥

2)कीदृश्यस्तेषु वाचः क्व च कथमथवा कस्य वाऽधिक्रियेरन्
अब्दौ स्रोतस्तरङ्गा इव च गुरुगिरो यद् गुणौघे स्खलन्ति ।
दद्युःखद्योतपोता द्युतिमतितनवस्तत्र किं यत्र राजा
मध्याह्नार्के समग्रो ग्लपित इव कृतो निग्रहश्च ग्रहाणाम् ॥

3) यात्रापात्रं पयोधाविव लयसमये मण्डलं वाऽण्डकोशे
रक्ताङ्गस्य व्रजे वा दिवसकररुचां कोरकं कैरवस्य ।
यज्ञाने भाति कृत्स्नं जगदतिविशदे नित्यनिर्दोषविद्याम्
आद्यां पद्मालयां तां हरिचरणरजोरागिणीं जोषयामः ॥

4) लक्ष्मीरक्षीणदीक्षा गणयितुमनुपक्रान्तसंविद् गुणानां
आनन्त्यानि स्वभर्तुः पदकमलकनिष्ठाङ्गुलीसन्नखस्य ।
पश्यन्ती सततं सा नवनवसुविशेषोपलम्भेन तत्तत्
काले कौतूहलाब्धौ सुमहति गहने गाहमानाऽवतान्नः ॥

5) चक्षाणा सौक्ष्म्ययोगाद् युगपदगणितानीक्षितुं दक्षिणाक्षी
पश्यत्यद्यापि नान्तं नयनहृदययोर्हारिणां हन्तु नोऽघम्
कालादस्मादनार्देनच किल कलयिष्यत्यनन्ताच्च हन्त
स्वान्तःसन्तोषिणी या निखिलगुणलयेषून्मिषन्ती परान्ते ॥

6) वेत्ता वक्ता विवेक्ता विविधगुणगणा पूर्णमेकैकमेषां
कोऽवा कार्त्स्न्यात् कवीन्द्रः क इव च कलयोक्तक्रमोन्नेयकानि ।
अज्ञान्यङ्गीकरिष्णुर्मनसि वचसि वा यो हि कल्पान्तकाल-
क्रान्तान्डोल्लोलकल्लोलिनि सलिलनिधौ सज्जते मज्जनाय ॥

7) वाग्भिर्वर्याभिरग्र्याः श्रुतिपदविदिता ब्रह्मवायू सुपर्णः
शेषेशाद्याः सुरेशा जनिशतवृतया भागवत्या च भक्त्या ।
देव्या दत्तावलम्बाः कथमपि करुणावारिराशौ रमेशे
त्वम्शांशे स्प्रष्टुमीशास्तदिह तदितरे के नु कल्पा वयं के ॥

8) अप्येवं हन्त धाष्ट्र्यात् कतिपयपदकैरीड्यपादस्य पांसून्
अस्माभिः स्तावयन्त्वित्यलममलमतीनन्वियां तानवन्याम् ।
भावं भावं सुभीतो भवगतिभिरहं मोहमोक्षे विवक्षन्
कारंकारं सपर्यां परमपदमदः संविवित्सन् विविक्षन् ॥

9) पादः सादं सदा नो दरयतु स हरेर्यो बलेः कालनेच्छा
वर्धिष्णोरूर्ध्वमृद्धः सपदि नखमुखेनाण्डखण्डं चखान ।
आयान्त्या स्वःस्रवन्त्या स्वतळकिसलयज्योत्स्नया व्याप विश्वम्
वर्ण्यम्भोभिर्विलिम्पन्निव भुवनमहाभित्तिमत्या पफाल ॥

10) पान्त्वस्मान्स्ताक्ष्र्यकेतोः पदनखमणयो यत्र चित्रायमाणाः
सौपर्ण्यश्चित्रवर्णाः प्रतिकृतय इति भ्रान्तिमाजन्ति भान्त्यः ।
प्रायश्चित्तं चिकीर्षुर्बहुगुणमधिकातिक्रमाशङ्कयांऽहः
संहर्तुः पादमूलं स्वयमिह दशभिर्मूर्तिभिः सोऽवतीर्णः ॥

11) हृद्यं तच्चिन्तयामः परमपदयुगं साधु यत् सन्निधानात्
अत्युद्रिक्तोरुकान्तेर्नखमणिनिखरान्निष्कळन्केन्दुजालात् ।
निष्ठ्यतोऽर्चिष्कलापो हृदयवरकमुद्दीपयेद् ध्वान्तमन्तः
कृन्तेद् भिन्देच्च तापं भयमुपशमेद् दर्शयेदाशु तत्वम् ॥

12) चीर्णं पुण्यं सुतीर्णं व्रजिनमवजिताः शत्रवः क्षेत्रजा यैः
हृत् पद्मं तत् पदाब्जद्युतिभिरहरहः क्षाल्यते क्षोदिताघैः ।
धन्यैर्विन्यस्यमाने मनसि मुनिजनैः स्वार्जितं कर्म भर्म
स्वोजोजालोज्वलेऽमिन् ज्वलन इव विशुध्यर्थमध्यर्पयामः ॥

13) नित्योपास्त्यादराभ्यागतगिरिशमुखोदारदैत्यारिवार
प्ररब्धोरुप्रणामावसरवितरणे प्रीतिहेतोश्चचाल ।
यावत् तावत् स्वधर्माचरणरतरमा रम्यपादाग्रलीला
सिन्जन्मञ्जीरमञ्जुध्वनिपरिचरितः पातु मां विष्णुपादः ॥

14) दिध्यासोर्ध्वन्तघातोपहितनिजमहः संभृतस्तम्भशोभाम्
बिभ्राणे निघ्नतां नः स्मरणसरणिका विघ्नमीशस्य जङ्घे ।
श्रीमज्जानुप्रभामुड्मणिमुकुर शिरः शेखरे श्रीकराभ्या–
मारोप्याङ्कं विपङ्कं परिमृदु मृदिते शेषपर्यङ्कतो ये ॥

15) सौन्दर्यं सौकुमार्यं बलमतिबहुलं तेज ओजः प्रतापः
तारुण्यं चेत्यमीषामहमहमिकये वातिसम्बाधयोगात् ।
अन्तःपूर्तेर्द्रढिष्ठावपि परिमृदुलौ पीवरौ दारितारेः
ऊरू दूरीक्रियास्तां दुरितमरमधीमेदुरं मे दुरन्तम् ॥

16) शुद्धिं बुद्धेर्विदद्याद् गुरुजनकजगद् दीपदीप्तान्तरीया
श्लिश्यत्कौशेययपीतांशुकवलनलसत् काञ्चनोद्दामकाञ्ची ।
निष्टप्तस्निग्धहेमाचलकटकतटा स्फालनास्फारपूर
त्वंगद् बलातपान्तप्रतिघटिततटित् कोटिमालोज्वला नः ॥

17)  निम्नो नाभिः सुवृत्तस्तनुरिति गणना का गुणानामणूनाम्
विष्णोर्विश्वैकनीडं नळिनमिदमुदैदुद्वमद् रोचिरोघम् ।
यस्माद् यस्मिन्नली कः श्रुतिभिरभिरुवन् ब्रह्म नारयणाख्यम्
नित्यानन्दोरुसंवित् सदवयमवदो वेद्यते यत्र चित्रम् ॥

18) मुक्ताग्रण्यावलीनामभिमतवसतिस्तासु चानुप्रविष्टम्
स्वैरं बन्धेन बद्धं विमलसुखचिता स्वेन चापि स्वतन्त्रम् ।
निर्दोषं दोषपुञ्जप्रसवि गुणजुषां निर्गुणं सद्गुणाढ्यम्
सर्गेऽपि ग्रस्तविश्वं तनु महदुदरं पातु नश्चित्रमित्थम् ॥

19) लक्ष्म्यावक्षःश्रिताया: प्रतिकृतिभिरिहा ध्यासनेनोल्लसन्त्याः
लोलन्त्यान्दोलिकेव क्षणरुचिरुचिरै रञ्जितार्धा तदुस्रैः ।
मुक्तामाला विमुक्तद्रुहिणगणतनुर्नोत्यमुक्तस्य कन्ठे
भक्त्या सक्ता विमुक्त्यै भवतु भवभयाद् भूयसो भाविता नः॥

20) ध्येयं धीरश्चिरं तद् विकटमणिशिला मण्डलोद्भासि वक्षो
यस्मिन् विस्मापयन्ती भुवनमतुलया लीलयोल्लसिनी श्रीः ।
यस्या आस्येन्दुकान्त्या विमलविततया न्यक्कृतश्चक्रपाणेः
प्रोद्यद् प्रद्योतनौघं द्युतिभिरभिनुदन् कौस्तुभः कण्टवेषः ॥

21) सर्वाङ्गीणोऽङ्गरागः परिमळसुरभिः सुन्दरश्चन्दनाद्यैः
मुक्तामाला च लक्ष्मी स्वयमतिललिता रत्नराजश्च राजन् ।
निस्तापं नित्यभद्रं स्वरससुरभि च श्रीपतेर्बाहुमध्यं
लोकप्रेक्षाभयाद्वाऽवृणत बहुगुणं स्वात्मशोभेच्छया वा ॥

22) दीर्घाः पीनाः सुवृत्ता महितमणिमहैर्भूषणैर्भासुरा ये
लोकातीतास्त्रिलोकीपितुरतिरुचिराश्चक्रशङ्खादिचिह्नैः ।
आक्रान्ताः क्रान्तिमन्तः प्रियतमकमलाभोगभाजो भुजास्ते
भूम्नो भक्तान् विभूतिं स्वसदृशमभया भाजयन्तो जयन्ति ॥

23) जह्यादंहांस्यसह्यान्युपहतमिहिरप्रग्रहोग्रांशु चक्रम्
दद्यात् सद्यः सुविद्यां विधुधवळरुचिः प्राञ्चितः पाञ्चजन्यः ।
हृद्याविद्यां विनुद्याद् दितिसुतदलनी नो गदा दुर्मदारेः
पद्मं पद्मामुखश्रीनिशमनमुकुराकारि कुर्यात् सुखानि ॥

24) उन्नम्रस्कन्धपर्याकलनपरिलसच्छश्वदम्लानमाला
व्यालोलद्दिव्यदीव्यन्मधुकरनिकरानूक्तिकोलाहलो नः ।
दूरीकुर्यादविद्याकृतमतिविकृतं भूषिताकल्पजाता
श्रीभाह्वाश्लेषवेषाच्युतगलगलितो वेदनादो गभीरः ॥

25) पूर्णानन्तामलेन्दुप्रकरमतिशयानस्य कान्त्या मुखेन्दोः
सौभाग्यं भाग्यदेव्याः स्वभिमतकमितुर्वर्ण्यते किं विविच्य ।
यत् संसृत्यैव तापान् प्रजहति जनता यत्र सङ्गादसङ्गे
मङ्गल्याङ्ग्या मनोज्ञ्यं मुखकमलमभून्मङ्गलैकप्रसूतिः ॥

26) वन्दे विष्णोर्मुखाब्जं मणिमकरचलत् कुण्डलोल्लासिगण्डम्
चारुभ्रूनम्रनासं सरसिजनयनं ताम्रकम्राधरोष्ठम् ।
उन्मीलत्कुन्दवृन्दद्युतिमतिशयतश्चोल्लसन्त्या हसन्त्या
मज्जन्त्या वाऽधरोष्ठारुणमणि रुचिरं दन्तपङ्क्त्यन्तकान्त्या ॥

27) आनन्दं सन्दधानो हृदि मुदमदयं मन्दयन्निन्द्रियाणाम्
तन्वन् दान्तिं दुरन्तं दुरितदरदुहं द्रावयन् दोषराशिम् ।
कैवल्यं द्योतयन् स्वं दिवसमनु सतां दासतां दर्शयन् नो
मौकुन्दो मन्दहासो दिशतु कृतदयो वन्दितः स्वापरोक्ष्यम् ॥

28) सुव्यक्तोद्रिक्तभक्तिप्रसरभरनमन्नाकिलोकावलोक-
प्रोद्यद् प्रौडानुकम्पापरवशविशदव्यञ्जिताणुस्मितेन्दोः ।
निर्यन्नीरोधनानामुखसुखरमयूखोत्करोत्काश्यमानैः
साकं पीयूषपूरैः सुखयतु सुजनैर्मां जगज्जन्मभूमिः ॥

29) यस्मादस्माकमित्रादमितमहिमतो हृष्यतो रुष्यतो वा
लोकाः पुष्यन्ति शुष्यन्त्यपि खलु निखिलाः साकमाकं परस्य ।
सोऽयं सोपानभूमिर्विधिभवविभवोद्भावयित्र्या; सवित्र्याः
स्रष्टृणां दृष्टिपाते जगति जनिमृतेर्मोक्षहेतुः कटाक्षः ॥

30) कृष्णात्मानः सुवक्रा विलुळिततिलका लोकभर्तुः परस्त्री-
वक्त्रामर्शाद् विवर्णा गुरुपितुरलका उत्तमाङ्गाश्रया नः।
ध्याताश्चेतोविशुद्धिम् विदधति तदिदं नैव चित्रं नमस्त-
चूडारत्नाय रम्यद्युतिनिकरसमा पूरिताशामुखाय ॥

31) स्वान्ते स्वान्ते वसन्त्या विहितकलिमलोपरमाया रमायाः
भर्तुर्भर्तुर्गुणानां स्थिरतरतरुण श्रीधराया धरायाः।
स्वोरुं स्वोरुं गुरूणामपि मम कृतसम्मोददानो ददानो
दद्यादद्याच्युतो मे सुमतिमिह सतां सम्प्रदायप्रदाय ॥

32) पूर्णप्रज्ञस्य साक्षादपि निजगुणतः श्रीमदानन्दतीर्थ
प्राज्ञाचार्यस्य शिष्यः स्तवमिति कृतवांस्तत्प्रसादावलम्बात् ।
तेन त्रैविक्रमेण प्रणिहितकरणः स्तौति यस्तं सुभक्तः
तस्मै स्वामी रमेशः प्रदिशतु विशदां दृष्टिमिष्टां च भक्तिम् ॥

॥ इति श्रीकविकुलतिलक त्रिविक्रमपण्डिताचार्यविरचिता विष्णुस्तुतिः ॥